## दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। (५६/१४३३)

दृत्यादिभ्यः प्रातिपदिकेभ्यः ढञ् प्रत्ययो भवति तत्र भवः इत्येतस्मिन् [1]विषये। दृतौ भवं दार्तेयम्। [2]कौक्षेयम्। कालशेयम्। वास्तेयम्। आस्तेयम्। आहेयम् अजरं विषम्। अस्तिशब्दः प्रातिपदिकं, न [3]तिङन्तः॥

## ग्रीवाभ्योऽण् च। (५७/१४३४)

ग्रीवाशब्दाद् अण् प्रत्ययो भवति, चकाराड् ढञ् च, तत्र भवः इत्येतस्मिन् विषये। [4]शरीरावयवाद् यतोऽपवादः। [5]ग्रीवासु भवं [6]ग्रैवम्, ग्रैवेयम्। ग्रीवाशब्दो धमनीवचनस्तासां बहुत्वाद् बहुवचनं कृतम्॥

## गम्भीराञ् ञ्यः। (५८/१४३५)

गम्भीरशब्दाद् ञ्यः प्रत्ययो भवति तत्र भवः इत्येतस्मिन् विषये। अणोऽपवादः। गम्भीरे भवं गाम्भीर्यम्।

[४५३] बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्। (म. भा. २.३१०)

बाह्यम्। दैव्यम्। पाञ्चजन्यम्[7]॥

## अव्ययीभावाच्च। (५९/१४३६)

अव्ययीभावसञ्ज्ञकात् प्रातिपदिकाच् च ञ्यः प्रत्ययो भवति तत्र भवः इत्येतस्मिन् विषये। अणोऽपवादः। न च सर्वस्मादव्ययीभावाद् भवति, किं तर्हि, परिमुखादेः। परिमुखादीनां [8]च [9]गणपाठस्य [10]एतदेव प्रयोजनम्। तेषां विशेषण[11]मव्ययीभावग्रहणम्। परिमुखं भवं पारिमुख्यम्। पारिहनव्यम्। [12]परिमुखादेरन्यत्र न भवति, [13]औपकूलम्।

परिमुख। परिहनु। पर्योष्ठ। पर्युलूखल[14]। परिसीर। [15]अनुसीर। [16]उपसीर। [17]उपस्थल। [18]उपकलाप। अनुपथ। अनुखड्ग। अनुतिल। अनुशीत। अनुमाष। अनुयव। अनुयूप। अनुवंश॥

## अन्तःपूर्वपदाट् ठञ्। (६०/१४३७)

अव्ययीभावात् इत्येव। अन्तःशब्दो विभक्त्यर्थे समस्यते। तत्पूर्वपदात् अव्ययीभावाट् ठञ् प्रत्ययो भवति तत्र भवः इत्येतस्मिन् विषये। अणोऽपवादः। आन्तर्वेश्मिकम्। आन्तर्गेहिकम्[19]।

---

1. अर्थे फ ह. 2. नास्ति ब. 3. तिङन्तम् ब. 4. शरीरावयवयतोऽपवादः ब. क. ड. फ. ह.
5. ग्रीवाभवं फ. 6. ग्रैवम् नास्ति ब. 7. चतुर्मासाद् यज्ञे ञ्यो वक्तव्यः (म. भा. 2.310)। चातुर्मास्यानि व्रतानि। चातुर्मास्यो यज्ञः। चातुर्मासोऽन्यत्र इत्यधिकम् ब. क. इ. 8. च नास्ति फ. 9. गणे पाठस्य ड.
10. एष एव प्रत्ययो भवति क. 11. °ग्रहणम् क. 12. पारिमुखादेः क. 13. औपमूलम् ब. ड. क. इ. फ.
14. उपस्थूल इत्यधिकम् ड. 15. अनुसीर नास्ति फ, अवशीर क. 16. उपस्थीर फ. 17. उपस्थाल इत्यधिकम् ब, परिस्थल फ. 18. उपकपाल इ, उपकर्ण ह. 19. आन्तरगारिकम् इत्यधिकम् ब. क. ड. इ, आन्तर्मालिकम् इत्यधिकम् ह.